श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ प्रस्तावपद्धतिः प्रथमा ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ प्रस्तावपद्धतिः प्रथमा ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

सन्तः श्रीरङ्गपृथ्वीशचरणत्राणशेखराः।
जयन्ति भुवनत्राणपदपङ्कजरेणवः॥ १.१ ॥

भरताय परं नमोऽस्तु तस्मै प्रथमोदाहरणाय भक्तिभाजाम्।
यदुपज्ञमशेषतः पृथिव्यां प्रथितो राघवपादुकाप्रभावः॥ १.२ ॥

वर्णस्तोमैर्वकुळसुमनोवासनामुद्वहन्तीं
आम्नायानां प्रकृतिमपरां संहितां दृष्टवन्तम्।
पादे नित्यप्रणिहितधियं पादुके रङ्गभर्तुः
त्वन्नामानं मुनिमिह भजे त्वामहं स्तोतुकामः॥ १.३ ॥

दिव्यस्थानात् त्वमिव जगतीं पादुके गाहमाना
पादन्यासं प्रथममनघा भारती यत्र चक्रे।
योगक्षेमं सकलजगतां त्वय्यधीनं स जानन्
वाचं दिव्यां दिशतु वसुधाश्रोत्रजन्मा मुनिर्मे॥ १.४ ॥

नीचेऽपि हन्त मम मूर्धनि निर्विशेषं
तुङ्गेऽपि यन्निविशते निगमोत्तमाङ्गे।
प्राचेतसप्रभृतिभिः प्रथमोपगीतं
स्तोष्यामि रङ्गपतिपादुकयोर्युगं तत्॥ १.५ ॥

धत्ते मुकुन्दमणिपादुकयोर्निवेशात्
वल्मीकसम्भवगिरा समतां ममोक्तिः।
गङ्गाप्रवाहपतितस्य कियानिव स्यात्
रथ्योदकस्य यमुनासलिलाद्विशेषः॥ १.६ ॥

विज्ञापयामि किमपि प्रतिपन्नभीतिः
    प्रागेव रङ्गपतिविभ्रमपादुके त्वाम्।
व्यङ्क्तुं क्षमास्सदसती विगताभ्यसूयाः
    सन्तः स्पृशन्तु सदयैर्हृदयैः स्तुतिं ते॥ १.७ ॥

अश्रद्दधानमपि नन्वधुना स्वकीये
    स्तोत्रे नियोजयसि मां मणिपादुके त्वम्।
देवः प्रमाणमिह रङ्गपतिस्तथात्वे
    तस्यैव देवि पदपङ्कजयोर्यथा त्वम्॥ १.८ ॥

यदाधारं विश्वं गतिरपि च यस्तस्य परमा
    तमप्येका धत्से दिशसि च गतिं तस्य रुचिराम्।
कथं सा कंसारेर्द्रुहिणहरदुर्बोधमहिमा
    कवीनां क्षुद्राणां त्वमसि मणिपादु स्तुतिपदम्॥ १.९ ॥

श्रुतप्रज्ञासम्पन्महितमहिमानः कति कति
    स्तुवन्ति त्वां सन्तः श्रुतिकुहरकण्डूहरगिरः।
अहं त्वल्पस्तद्वद्यदिह बहु जल्पामि तदपि
    त्वदायत्तं रङ्गक्षितिरमणपादावनि ! विदुः॥ १.१० ॥

यदेष स्तौमि त्वां त्रियुगचरणत्रायिणि ! ततो
    महिम्नः का हानिस्तव मम तु सम्पन्निरवधिः।
शुना लीढा कामं भवतु सुरसिन्धुर्भगवती
    तदेषा किम्भूता स तु सपदि सन्तापरहितः॥ १.११ ॥

मितप्रेक्षालाभक्षणपरिणमत्पञ्चषपदा
    मदुक्तिस्त्वय्येषा महितकविसंरम्भविषये।
न कस्येयं हास्या हरिचरणधात्रि ! क्षितितले
    मुहुर्वात्याधूते मुखपवनविष्फूर्जितमिव॥ १.१२ ॥

निस्सन्देहनिजापकर्षविषयोत्कर्षोऽपि हर्षोदय-
    प्रत्यूढक्रमभक्तिवैभवभवद्वैयात्यवाचालितः।

रङ्गाधीशपदत्रवर्णनकृतारम्भैर्निगुम्भैर्गिरां
    नर्मास्वादिषु वेङ्कटेश्वरकविर्नासीरमासीदति॥ १.१३ ॥

रङ्गक्ष्मापतिरत्नपादु ! भवतीं तुष्टूषतो मे जवात्
    जृम्भन्तां भवदीयशिञ्जितसुधासन्दोहसन्देहदाः।
श्लाघा घूर्णितचन्द्रशेखरजटाजङ्घालगङ्गापयः
    त्रासादेशविशृङ्खलप्रसरणोत्सिक्ताः स्वयं सूक्तयः॥ १.१४ ॥

हिमवन्नळसेतुमध्यभाजां भरताभ्यर्चितपादुकावतंसः।
अतपोधनधर्मतः कवीनाम् अखिलेष्वस्मि मनोरथेष्वबाह्यः॥ १.१५ ॥

अनिदं प्रथमस्य शब्दराशेरपदं रङ्गधुरीणपादुके ! त्वाम्।
गतभीतिरभिष्टुवन् विमोहात् परिहासेन विनोदयामि नाथम्॥ १.१६ ॥

वृत्तिभिर्बहुविधाभिराश्रिता वेङ्कटेश्वरकवेः सरस्वती।
अद्य रङ्गपतिरत्नपादुके ! नर्तकीव भवतीं निषेवताम्॥ १.१७ ॥

अपारकरुणाम्बुधेस्तव खलु प्रसादादहं
    विधातुमपि शक्नुयां शतसहस्रिकां संहिताम्।
तथापि हरिपादुके ! तव गुणौघलेशस्थितेः
    उदाहृतिरियं भवेदिति मितापि युक्ता स्तुतिः॥ १.१८ ॥

अनुकृतनिजनादां सूक्तिमापादयन्ती
    मनसि वचसि च त्वं सावधाना मम स्याः।
निशमयति यथासौ निद्रया दूरमुक्तः
    परिषदि सह लक्ष्म्या पादुके ! रङ्गनाथः॥ १.१९ ॥

त्वयि विहिता स्तुतिरेषा पदरक्षिणि ! भवति रङ्गनाथपदे।
तदुपरि कृता सपर्या नमतामिव नाकिनां शिरसि॥ १.२० ॥

॥ इति श्रीपादुकासहस्रे प्रस्तावपद्धतिः प्रथमा ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥